संवत्, व्य, वत्सरः। इत्यमरः॥ अधुना विक्रमादित्यराजवत्सरः संवत् इति ख्यातः॥ (स्त्री भूमिविशेषः। यथा, वाजसनेयसंहितायाम्। ११। १२।

"वरिष्ठामनु संवतम्।"

"वन सम्भक्तौ संवन्यते सम्यगभज्यते भूहरणार्थं सेव्यते इति संवत् संपूर्व्वस्य वनतेः क्विप्येतद्रूपम्। मृत्खननयोग्या भूमिः संवत्। सा च पाषाणाद्यभावेनातिप्रशस्तत्वाद्वरिष्ठेत्युच्यते।" इति तद्भाष्यम्॥*॥ संग्रामः। इति निघण्टुः। २। १७॥)

संवत्सरः, पुं, (संवसन्ति ऋतवो यत्र। सं + वस निवासे + "संपूर्व्वात् चित्।" उणा० ३। ७२। इति सरन्।) वत्सरः। इत्यमरः॥ "संवसन्ति ऋतवो यत्र संवत्सरः वस श्री निवासे नाम्नीति सरः स्य तः। संवदति भावान् इति वदो रूपं वा।" इति भरतः॥ पञ्चविधवत्सरान्तर्गतप्रथमवत्सरः। यथा—

"शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः।

परीदानुपूर्व्वाश्च तथोदापूर्व्वकाः मताः॥"

संवत्सरादिफलं विष्णुधर्म्मोत्तरे।

"संवत्सरे तथा दानं तिलस्य च महाफलम्।

परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तमाः॥

इदापूर्व्वेऽथवस्त्राणां धान्यानाञ्चानुपूर्व्वकं।

उदासंवत्सरे दानं रजतस्य महाफलम्॥

ज्योतिर्व्विदस्त्विवत्समध्यात् प्रभवादेश्च सम्भवम्।

जगुस्तद्वत् समाद्यादिवर्षाणामपि सम्भवम्॥"

इति मलमासतत्त्वम्॥

संवदनं, क्ली, (सं + वद + ल्युट्।) आलोचनम्। वशीकरणम्। इति मेदिनी॥ (यथा, महाभारते। ३। २३२। ५७।

"एतज्ज्ञानामहं कर्त्तुं भर्त्तुः संवदनं महत्।

असत्स्त्रीणां समाचारं नाहं कुर्य्यान्न कामये॥")

संवादः। इति हेमचन्द्रः॥

संवदना, स्त्री, संवदनम्। वशक्रिया। यथा। मणिमन्त्रौषधैर्वशीकरणं संवदनम्। संपूर्व्वो वदिर्वशीकरणे भावेऽनट्। संवदना चेति केचित्। करणेऽनटि वशक्रियासाधने मणिमन्त्रादावपि। जयश्रियः संवदनं यतस्तदिति रघुः। संवननमिति पाठान्तरम् इत्यमरटीकायां भरतः॥

संवननं, क्ली, (सं + वन + ल्युट्।) संवदनम्। इत्यमरटीकायां रामाश्रमः॥ (यथा, कथासरित्सागरे। ३४। १६९।

"हृदयानुप्रवेशो हि प्रभोः संवननं महत्॥")

संवरं, क्ली, (सं + वृ + "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) जलम्। बौद्धव्रतविशेषः। इति केचित्॥ रभसे सकारमध्यपाठः। तत्र सम्बधातोररप्रत्ययेन निष्पन्नम्॥

संवरः, पुं, दैत्यविशेषः। मत्स्यविशेषः। हरिणविशेषः। इति केचित्॥ रभसकोषे सम्बर इति पाठः॥ (क्वचित् शम्बर इति च दृश्यते॥)

संवर्त्तः, पुं, (सं + वृत् + घञ्।) प्रलयः। इत्यमरः॥ (यथा, भागवते। ८। १५। २६।

"दहन्निव दिशो दिग्भिः संवर्त्ताग्निरिवोत्थितः॥")

मुनिविशेषः। (यथा, मार्कण्डेये। १३०। ११।

"ऋत्विक् तस्य तु संवर्त्तो बभूवाङ्गिरसः सुतः।

भ्राता बृहस्पतेर्विप्र महात्मा तपसां निधिः॥"

अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः॥)

कर्षफलद्रुमः। इति मेदिनी॥ मेघः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १२०। ८०।

"शुश्रुवे सुमहान् शब्दः संवर्त्तनिनदो यथा॥")

मेघनायकविशेषः। तस्य विवरणं यथा,—

"वियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात्।

आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम्॥

आवर्त्तो निर्जलो मेघः संवर्त्तश्च बहूदकः।

पुष्करो दुष्करजलो द्रोणः शस्यप्रपूरकः॥"

इति ज्योतिस्तत्त्वम्॥

संपूर्व्वकान्तःस्थवकारादिवृतधातोः घञ्प्रत्ययेन निष्पन्नत्वादनुस्वारमध्यः। मकारमध्योऽप्ययम्॥

संवर्त्तकः, पुं, (संवर्त्तयतीति। सं + वृत् + णिच् ण्वुल्।) बलदेवः। इति शब्दरत्नावली॥ बलदेवस्य लाङ्गलम्। वडवानलः। इति हेमचन्द्रः॥ (यथा, भागवते। १२। ४। ८।

"ततः संवर्त्तको वह्निः सङ्कर्षणमुखोत्थितः।

दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ॥")

संवर्त्तकी, [न्] पुं, (संवर्त्तकोऽस्यास्तीति। इनिः।) बलदेवः। इति त्रिकाण्डशेषः॥

संवर्त्तिः, स्त्री, (सम्यक्प्रकारेण वर्त्तते इति। सं + वृत् + "इर्पिषिकुहीति।" उणा० ४। ११८। इति इन्।) संवर्त्तिका। इत्यमरटीकायां भरतः॥

संवर्त्तिका, स्त्री, पद्मस्य केशरसमीपस्थदलम्। इत्यमरः॥ पद्मादीनां जटिकाकारे नवदले इत्यन्ये। सम्यक् वर्त्तते वर्द्धते इति संवर्त्तिका ण्वुः। संवर्त्तयति वेष्टयतीति वा नाम्नीति इ-प्रत्यये संवर्त्तिरपि। संवर्त्तिर्नवपत्रिकेति बोपालितः। पाक्षीणादीति ईपि संवर्त्ती च अतः स्वार्थे के संवर्त्तिका। सामान्यनूतनपत्रेऽपि संवर्त्तिकेति चण्डचन्द्रः॥ दलमात्रे च संवर्त्तिकेति मधुः। कुर्व्वाणा समकोचयदृशशताम्भोजसंवर्त्तिकेति मुरारिः। इति भरतः॥

संवर्द्धकः, त्रि, (संवर्द्धयतीति। सं + वृध् + णिच् + ण्वुल्।) संवर्द्धनकारी। इति हेमचन्द्रः॥

संवर्द्धनं, क्ली, (सं + वृध् + ल्युट्।) सम्यग्वृद्धिः। सन्दीपनम्। संपूर्व्ववृधधातोरनट्प्रत्ययेन निष्पन्नम्॥) यथा, महाभारते। १। ६३। १०१।

"पुरुषः स विभुः कर्त्ता सर्व्वभूतपितामहः।

धर्म्मसंवर्द्धनार्थाय प्रयज्ञेऽन्धकवृष्णिषु॥"

क्रीड़नम्। यथा, रामायणे। १११। १०।

"नित्यञ्च प्रियवादेन तथा संवर्द्धनेन च॥"

"संवर्द्धनं क्रीड़नम्।" इति तट्टीका॥)

संवर्द्धितः, त्रि, (सं + वृध् + णिच् + क्तः।) सम्यग्वृद्धिविशिष्टः। यथा,—

"अथ प्रभावोपनतैः कुमारं

कल्पद्रुमोत्थैरवकीर्य्य पुष्पैः।

उवाच वाग्मी दशनप्रभाभिः

संवर्द्धितोरःस्थलतारहारः॥"

इति रघौ ५ सर्गः॥

संवलितः, त्रि, (सं + वल + क्तः।) मिश्रितः। एकत्रीकृतः। यथा। प्रकृतग्रन्थस्थस्वरसंवलितस्यैव पाठस्य धर्त्तुमुचितत्वाद्रागमवधारणं युक्तम्। इति पञ्चताजागदीशी टीका॥

अन्यच्च।

"प्रतीयमानः प्रत्येकं प्रथमं हेतुरुच्यते।

ततः संवलितः सर्व्वो विभवादिः सचेतसाम्॥"

इति साहित्यदर्पणे ३ परिच्छेदः॥

संवसथः, पुं, (संवसत्यत्रेति। सं + वस + "उपसर्गे वसेः।" उणा० ३। ११४। इति अथः।) ग्रामः। इत्यमरः॥

संवहः, पुं, (संवहतीति। सं + वह + अच्।) सप्तवाय्वन्तर्गतप्रशस्तवायुः। स तु उद्वहवायोरुपरिष्ठः। इति सिद्धान्तशिरोमणिः॥ (यथा, महाभारते। १२। ३२८। ४२।

"चतुर्थः संवहो नाम वायुः स गिरिमर्द्दनः।

येन वेगवता रुग्णा रुद्वेगारुजता नगान्॥

वायुना सहिता मेघास्ते भवन्ति बलाहकाः।

दारुणोत्पातसञ्चारो नभसः स्तनयित्नुमान्॥"

संवाटिका, स्त्री, शृङ्गाटकः। इति जटाधरः॥

संवादः, पुं, (सं + वद + घञ्।) सन्देशवाक्यम्। समाचार इति यावत्। तत्पर्य्यायः। वाचिकम् २ सन्देशः ३। इति जटाधरः॥ सन्देशवाक् ४। इत्यमरः॥ वाचिकं तन्निवेदयत्र दूतत्वेनाभिशंसनम्। इति शब्दरत्नावली॥ (मिथःसम्भाषणम्। यथा, गीतायाम्। १८। ७०।

"अध्येष्यते च य इमं धर्म्म्यं संवादमावयोः।

ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥")

संवासः, पुं, (संवसन्त्यत्रेति। सं + वस + घञ्।) गृहम्। इति शब्दरत्नावली॥ (यथा, बृहत्संहितायाम्। ८५। १३।

"भयदो जनसंवासात्

यदि भाण्डान्यपनयेत् काकः॥")

पुरवासिनां विहारार्थं पुरमध्ये बहिर्व्वा अनावृतस्थानम्। तत्पर्य्यायः। सन्निवेशः २ सन्निकर्षणम् ३। इति जटाधरः॥ (यथा, रामायणे। २। ४८। ४।

"शृण्वन् वाचो मनुष्याणां ग्रामसंवासवासिनाम्।

राजानं धिक् दशरथं कामस्य वशमास्थितम्॥"

एकत्रावस्थानम्। यथा, मनुः। ८। २७३।

"मात्रया सह संवासे चाण्डाल्या तावदेव तु॥"

संवाहः, पुं, (संवाहतीति। सं + वह + णिच् + अच्।) अङ्गविमर्द्दकः। इति जटाधरः॥